1602

"वे. शा. सं. दामोदर भट्ट बिन गणेशभट्ट केळकर एरंडोल यांचे स्मरणार्थ"

संस्कृत] गंगाबाई भ्रतार दामोदर केळकर यांजकडून. [व्याकरण

क्र.नं. ४

४८१०व्या१

अष्टाध्यायी

धुळे शाके १८७३ माघ शुध्द ४ तारीख 10-2-1952 बुधवार } शाके १७३२ आश्विन शु० ३ रोजी लिहिलेली पोथी.

(१२१ वर्षे)

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक............
हस्तलिखित ग्रंथ संग्रह.

४८/७११२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

१

ओत्॥ संबुद्धौ शाकल्यस्येतावनार्षे॥ उञः॥ ऊँ॥ ईदूतौ च सप्तम्यर्थे॥ दाधाघ्व
(1) दाप्॥ १॥ ॥आद्यंतवदेकस्मिन्॥ तरप्तमपौ घः॥ बहुगणवतुडति संख्या॥ ष्णां
तापट्॥ डतिच॥ क्तक्तवतू निष्ठा॥ सर्वादीनि सर्वनामानि॥ विभाषा दिक्समासे
बहुब्रीहौ॥ न बहुब्रीहौ॥ तृतीयासमासे॥ द्वंद्वे च॥ विभाषा जसि॥ प्रथमचर
५५४ मतयाल्पार्धकतिपनेमाश्च॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसं
ज्ञायां॥ स्वमज्ञातिधनाख्यायां॥ अंतरं बहिर्योगोपसंव्यानयोः॥ स्वरादिनिपा
तमव्ययं॥ तद्धितश्चासर्वविभक्तिः॥ कृन्मेजंतः॥ क्त्वातोसुन्कसुनः॥ २॥ ॥अव्य १
यीभावश्च॥ शि सर्वनामस्थानं॥ सुडनपुंसकस्य॥ न वेति विभाषा॥ इग्यणः सं

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao...

(२)

सू॰पा॰ २

प्रसारणं॥ आद्यंतौ टकितौ॥ मिदचोंत्यात्परः॥ एच इग्घ्रस्वादेशे॥ षष्ठी स्थानेयो
गा॥ स्थानेंतरतमः॥ उरण्रपरः॥ अलोंत्यस्य॥ ङिच्च॥ आदेः परस्य॥ अनेकाल्
शित्सर्वस्य॥ स्थानिवदादेशोनल्विधौ॥ अचः परस्मिन्पूर्वविधौ॥ नपदांतद्विर्वं
चनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥ द्विर्वचनेचि॥ अदर्शनं लो
पः॥ ३॥ ॥ प्रत्ययस्य लुक्श्लुलुपः॥ प्रत्ययलोपे प्रत्ययलक्षणं॥ न लुमतांगस्य॥
अचोंत्यादिटि॥ अलोंत्यात्पूर्व उपधा॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥ तस्मादित्यु
त्तरस्य॥ स्वंरूपं शब्दस्याशब्दसंज्ञा॥ अणुदित्सवर्णस्य चाप्रत्ययः॥ तपरस्त
त्कालस्य॥ आदिरंत्येन सहेता॥ येन विधिस्तदंतस्य॥ वृद्धिर्यस्याचामादिस्त

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

१

(2A)

वृद्धं॥त्यदादीनिच॥एङ्प्राचांदेशे॥४॥ ॥वृद्धिराद्यंतवदव्ययीभावःप्रत्ययस्य
लुक्पंचदश॥ ॥इतिसूत्रपाठेप्रथमाध्यायस्यप्रथमःपादः॥ ॥गाङ्कुटादिभ्यो
ञ्णिन्ङित्॥विजइट्॥विभाषोर्णोः॥सार्वधातुकमपित्॥असंयोगाल्लिट्कित्॥इं
धिभवतिभ्यांच॥मृडमृदगुधकुषक्लिशवदवसःक्त्वा॥रुदविदमुषग्रहिस्वपि
प्रच्छःसंश्च॥इकोझल्॥हलंताच्च॥लिङ्सिचावात्मनेपदेषु॥उश्च॥वागमः॥हनः
सिच्॥यमोगंधने॥विभाषोपयमने॥स्थाघ्वोरिच्च॥नक्त्वासेट्॥निष्ठाशीङ्स्वि
दिमिदिक्ष्विदिधृषः॥मृषस्तितिक्षायां॥२॥ ॥उदुपधाद्भावादिकर्मणोरन्यतर
स्यां॥पूङःक्त्वाच॥नोपधात्थफांताद्वा॥वंचिलुंच्यृतश्च॥तृषिमृषिकृशेःकाश्यप

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

सू०पा० २

पस्य॥ रलोव्युपधाद्धलादेः संश्च॥ ऊकालोऽज्झ्रस्वदीर्घप्लुतः॥ अचश्च॥ उच्चैरुदात्तः॥
नीचैरनुदात्तः॥ समाहारस्वरितः॥ तस्यादितउदात्तमर्धह्रस्वं॥ एकश्रुतिदूरात्संबु
द्धौ॥ यज्ञकर्मण्यजपन्यूंखसामसु॥ उच्चैस्तरांवावषट्कारः॥ विभाषाछंदसि॥ न
सुब्रह्मण्यायांस्वरितस्यतूदात्तः॥ देवब्रह्मणोरनुदात्तः॥ स्वरितात्संहितायामनुदा
त्तानां॥ उदात्तस्वरितपरस्यसंनतरः॥ २॥ ॥ अपृक्तएकाल्प्रत्ययः॥ तत्पुरुषः समा
नाधिकरणः कर्मधारयः॥ प्रथमानिर्दिष्टंसमासउपसर्जनं॥ एकविभक्तिचापू
र्वनिपाते॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकं॥ कृत्तद्धितसमासाश्च॥ ह्रस्वो
नपुंसकेप्रातिपदिकस्य॥ गोस्त्रियोरुपसर्जनस्य॥ लुक्तद्धितलुकि॥ इद्गोण्याः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

१

लुपियुक्तवद्व्यक्तिवचने ॥ विशेषणानांचाजातेः ॥ तदशिष्यंसंज्ञाप्रमाणत्वात् ॥ लुब्
योगाप्रख्यानात् ॥ योगप्रमाणेचतदभावेदर्शनंस्यात् ॥ प्रधानप्रत्ययार्थवचन
मर्थस्यान्यप्रमाणत्वात् ॥ कालोपसर्जनेचतुल्यं ॥ जात्याख्यायामेकस्मिन्बहुवच
(3A) नमन्यतरस्यां ॥ अस्मदोद्वयोश्च ॥ फल्गुनीप्रोष्ठपदानांचनक्षत्रे ॥ २ ॥ ॥ छंदसि
पुनर्वस्वोरेकवचनं ॥ विशाखयोश्च ॥ तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुवचनस्य
द्विवचनंनित्यं ॥ सरूपाणामेकशेषएकविभक्तौ ॥ वृद्धोयूनातल्लक्षणश्चेदेव
विशेषः ॥ स्त्रीपुंवच्च ॥ पुमान्स्त्रिया ॥ भ्रातृपुत्रौस्वसृदुहितृभ्यां ॥ नपुंसकमन
पुंसकेनैकवच्चास्यान्यतरस्यां ॥ पितामात्रा ॥ श्वशुरःश्वश्र्वा ॥ त्यदादीनिसर्वैर्नि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

सू॰ठ॰ त्यं॥ ग्राम्यपशुसंघेष्वतरुणेषुस्त्री॥ ४॥ ॥गाङ्कुटाद्युउपधाद्‌ष्टक्त्वश्छंदसिपुनर्व
५ स्वोस्त्रयोदश॥ ॥इतिसूत्रपाठेप्रथमोध्यायस्यद्वितीयःपादः॥ ॥भूवादयोधात
वः॥ उपदेशोजनुनासिकइत्॥ हलंत्यं॥ नविभक्तौतुस्माः॥ आदिर्ञिटुडवः॥ षःप्रत्य
यस्य॥ चुटू॥ लशक्वतद्धिते॥ तस्यलोपः॥ यथासंख्यमनुदेशःसमानां॥ स्वरिते
नाधिकारः॥ अनुदात्तङितआत्मनेपदं॥ भावकर्मणोः॥ कर्तरिकर्मव्यतिहारे॥ न
गतिहिंसार्थेभ्यः॥ इतरेतरान्योन्योपपदाच्च॥ नेर्विशः॥ परिव्यवेभ्यःक्रियः॥ वि
पराभ्यांजेः॥ आङोदोनास्यविहरणे॥ १॥ ॥क्रीडोनुसंपरिभ्यश्च॥ सम वप्रविभ्यः
स्थः॥ प्रकाशनस्थेयाख्ययोश्च॥ उदोनूर्ध्वकर्मणि॥ उपान्मंत्रकरणे॥ अकर्म

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the Rajawade

१

(5A)

काच्च॥उद्विभ्यांतपः॥आङोयमहनः॥समोगम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः॥
निसमुपविभ्योह्वः॥स्पर्धायामाङः॥गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्र
कथनोपयोगेषुकृञः॥अधेःप्रसहने॥वेःशब्दकर्मणः॥अकर्मकाच्च॥संमाननो
त्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषुनियः॥कर्तृस्थेचाशरीरेकर्मणि॥वृ
त्तिसर्गतायनेषुक्रमः॥उपपराभ्यां॥आङउद्गमने॥२॥ ॥वेःपादविहरणे॥प्रोपा
भ्यांसमर्थाभ्यां॥अनुपसर्गाद्वा॥अपह्नवेज्ञः॥अकर्मकाच्च॥संप्रतिभ्यामनाध्या
ने॥भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषुवदः॥व्यक्तवाचांसमुच्चारणे॥
अनोरकर्मकात्॥विभाषाविप्रलापे॥अवाद्ग्रः॥समःप्रतिज्ञाने॥उदश्चरःसकर्म

(5)

स्०पा० कात्॥ समस्तृतीयायुक्तात्॥ दाणश्च सा चेच्चतुर्थ्यर्थे॥ उपाद्यमः स्वकरणे॥ ज्ञाश्रु

५ स्मृदृशां सनः॥ नानोर्ज्ञः॥ प्रत्याङ्भ्यां श्रुवः॥ शदेः शितः॥ ३॥ ॥म्रियतेर्लुङ्लि

ङोश्च॥ पूर्ववत्सनः॥ आम्प्रत्ययवत्कृञोनुप्रयोगस्य॥ प्रोपाभ्यां युजेरयज्ञपा

त्रेषु॥ समः क्ष्णुवः॥ भुजोनवने॥ णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने॥ भीस्म्यो

र्हेतुभये॥ गृधिवंच्योः प्रलंभने॥ लियः संमाननशालीनीकरणयोश्च॥ मिथ्यो

पपदात्कृञोभ्यासे॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ अपाद्वदः॥ णिचश्च॥

समुदाङ्भ्यो यमोग्रंथे॥ अनुपसर्गाज्ज्ञः॥ विभाषोपपदेन प्रतीयमाने॥ शेषा

त्कर्तरि परस्मैपदं॥ अनुपराभ्यां कृञः॥ अभिप्रत्यतिभ्यः क्षिपः॥ ४॥ ॥प्राद्वहः॥ ५

" Joint Project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

1

(5A)

परेर्मृषः॥ व्याङ्परिभ्यो रमः॥ उपाच्च॥ विभाषाकर्मकात्॥ बुधयुधनशजनेङ्प्रुद्रु
स्रुभ्यो णेः॥ निगरणचलनार्थेभ्यश्च॥ अणावकर्मकाच्चित्तवत्कर्तृकात्॥ नपादम्या
ङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ वाक्यषः॥ द्युद्भ्यो लुङि॥ वृद्भ्यः स्यसनोः॥
लुटि च कॢपः॥ ५॥ ॥ भूवादयः क्रीडोनुवेः पादम्रियतेः प्राद्वहस्त्रयोदश॥ ॥ इति सू
त्रपाठे प्रथमाध्याय तृतीयः पादः॥ ॥ आकडारादेका संज्ञा॥ विप्रतिषेधे परं का
र्यं॥ यू स्त्र्याख्यौ नदी॥ नेयङुवङ्स्थानावस्त्री॥ वामि॥ ङिति ह्रस्वश्च॥ शेषो घ्यस
खि॥ पतिः समास एव॥ षष्ठीयुक्तश्छन्दसि वा॥ ह्रस्वं लघु॥ संयोगे गुरु॥ दीर्घं च॥
यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेंगं॥ सुप्तिङन्तं पदं॥ नः क्ये॥ सिति च॥ स्वादिष्व

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the ... Mumbai

(6)

स्०ठ० ६ सर्वनामस्थाने ॥ यचिभं ॥ तसौमत्वर्थे ॥ अयस्मयादीनि छंदसि ॥ १ ॥ ॥ बहुषु ब
हुवचनं ॥ द्व्येकयोर्द्विवचनैकवचने ॥ कारके ॥ ध्रुवमपायेपादानं ॥ भीत्रार्थानां
भयहेतुः ॥ पराजेरसोढः ॥ वारणार्थानामीप्सितः ॥ अंतर्द्धौ येनादर्शनमिच्छति ॥
आख्यातोपयोगे ॥ जनिकर्तुः प्रकृतिः ॥ भुवः प्रभवः ॥ कर्मणा यमभिप्रैति स संप्रदा
नं ॥ रुच्यर्थानां प्रीयमाणः ॥ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥ धारेरुत्तमर्णः ॥
स्पृहेरीप्सितः ॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ क्रुधद्रुहोरुपसृष्टयोः कर्म ॥
राधीक्ष्योर्यस्य विप्रश्नः ॥ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ २ ॥ ॥ अनुप्रतिगृण
श्च ॥ साधकतमं करणं ॥ दिवः कर्म च ॥ परिक्रयणे संप्रदानमन्यतरस्यां ॥ आधा ६

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

९

(6A)

रोधिकरणं॥अधिशीङ्स्थासांकर्म॥अभिनिविशश्च॥उपान्वध्याङ्वसः॥कर्तुरी
प्सिततमंकर्म॥तथायुक्तंचानीप्सितं॥अकथितंच॥गतिबुद्धिप्रत्यवसार्थशब्द ना
कर्माकर्मकाणामणिकर्तासणौ॥हृक्रोरन्यतरस्यां॥स्वतंत्रःकर्ता॥तत्प्रयोजको
हेतुश्च॥प्राग्रीश्वरांनिपाताः॥चादयोसत्वे॥प्रादयः॥उपसर्गाःक्रियायोगे॥गति
श्च॥३॥ ॥ऊर्यादिच्विडाचश्च॥अनुकरणंचानितिपरं॥आदरानादरयोःसदस
ती॥भूषणेलं॥अंतरपरिग्रहे॥कणेमनसीश्रद्धाप्रतीघाते॥पुरोव्ययं॥अस्तं
च॥अच्छगत्यर्थवदेषु॥अदोनुपदेशे॥तिरोंतर्द्धौ॥विभाषाकृञि॥उपाजेन्वा
जे॥साक्षात्प्रभृतीनिच॥अनत्याधानउरसिमनसी॥मध्येपदेनिवचनेच॥

"Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(७)
सू०पा
७

नित्यं हस्ते पाणावुपयमने॥ प्राध्वंबंधने॥ जीविकोपनिषदावौपम्ये॥ तेप्राग्धातोः
॥४॥ ॥ छंदसिपरोपि॥ व्यवहिताश्च॥ कर्मप्रवचनीयाः॥ अनुर्लक्षणे॥ तृतीयार्थे॥
हीने॥ उपोधिकेच॥ अपपरीवर्जने॥ आङ्मर्यादावचने॥ लक्षणेत्थंभूताख्यान
भागवीप्सासुप्रतिपर्यनवः॥ अभिरभागे॥ प्रतिःप्रतिनिधिप्रतिदानयोः॥ अधिप
रीअनर्थकौ॥ सुःपूजायां॥ अतिरतिक्रमणेच॥ अपिःपदार्थसंभावनान्ववस
र्गगर्हासमुच्चयेषु॥ अधिरीश्वरे॥ विभाषाकृञि॥ लःपरस्मैपदं॥ तङानावात्म
नेपदं॥ ५॥ ॥ तिङस्त्रीणित्रीणिप्रथममध्यमोत्तमाः॥ तान्येकवचनद्विवचनबहुवच ७
नान्येकशः॥ सुपः॥ विभक्तिश्च॥ युष्मद्युपपदेसमानाधिकरणेस्थानिन्यपिमध्य

२ मः॥प्रहासेचमन्योपपदेमन्यतेरुत्तमएकवच्च॥अस्मद्युत्तमः॥शेषेप्रथमः॥परःसं
निकर्षःसंहिता॥विरामोवसानं॥६॥ ॥आकडाराद्द्वऊघनुप्रतिगणऊर्यादिछंद
(नम) सितिङोदश॥ ॥इतिप्रथमाध्यायस्यचतुर्थःपादः॥ ॥इतिप्रथमोध्यायःसमाप्तः॥
॥ॐ॥समर्थःपदविधिः॥सुबामंत्रितेपरांगवत्स्वरे॥प्राक्कडारात्समासः॥सहसुपा॥
अव्ययीभावः॥अव्ययंविभक्तिसमीपसमृद्धिव्यृध्यर्थाभावात्ययासंप्रतिशब्दप्रा
ग्र दुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु॥यथासादृ
श्ये॥यावदवधारणे॥सुप्रतिनामात्रार्थे॥अक्षशलाकासंख्याःपरिणा॥विभा
षा॥अपपरिबहिरंचवःपंचम्या॥आङ्मर्यादाभिविध्योः॥लक्षणेनाभिप्रतीआ

Mandal, Dhule and ... Mumbai.

(४)

सू॰पा॰१ भिमुख्ये॥ अनुर्यत्समया॥ यस्यचायामः॥ तिष्ठद्गुप्रभृतीनिच॥ पारेमध्येषष्ठ्या
८ वा॥ संख्यावंश्येन॥ नदीभिश्च॥ १॥ ॥ अन्यपदार्थेचसंज्ञायां॥ तत्पुरुषः॥ द्विगु
श्च॥ द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः॥ स्वयंक्तेन॥ खट्वाक्षेपे॥ सा
मि॥ कालाः॥ अत्यंतसंयोगेच॥ तृतीयातत्कृतार्थेनगुणवचनेन॥ पूर्वसदृशसमो
नार्थकलहनिपुणमिश्रश्लक्ष्णैः॥ कर्तृकरणेकृताबहुलं॥ कृत्यैरधिकार्थव
चने॥ अंनेनव्यंजनं॥ भक्ष्येणमिश्रीकरणं॥ चतुर्थीतदर्थार्थबलिहितसुख
रक्षितैः॥ पंचमीभयेन॥ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः॥ स्तोकांतिक
दूरार्थकृच्छ्राणिक्तेन॥ सप्तमीशौंडैः॥ २॥ ॥ सिद्धशुष्कपक्वबंधैश्च॥ ध्वांक्षेण ८१

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

२

श्री

(8A)

क्षेपे॥ कृत्यैर्‌ऋणे॥ संज्ञायां॥ क्तेनाहोरात्रावयवाः॥ तत्र॥ क्षेपे॥ पात्रेसंमितादयश्च॥
पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन॥ दिक्संख्येसंज्ञायां॥
तद्धितार्थोत्तरपदसमाहारेच॥ संख्यापूर्वोद्विगुः॥ कुत्सितानिकुत्सनैः॥ पापाण
केकुत्सितैः॥ उपमानानिसामान्यवचनैः॥ उपमितंव्याघ्रादिभिः सामान्याप्रयोगे॥
विशेषणंविशेष्येणबहुलं॥ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवी
राश्च॥ श्रेण्यादयःकृतादिभिः॥ क्तेननञ्विशिष्टेनानञ्॥ ३॥ ॥सन्महत्परमोत्त
मोत्कृष्टाःपूज्यमानैः॥ वृंदारकनागकुंजरैःपूज्यमानं॥ कतरकतमौजातिपरि
प्रश्ने॥ किंक्षेपे॥ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृ

(१)

सू०पा॰ ९

श्रोत्रियाध्यापकधूर्तैर्जातिः॥ प्रशंसावचनैश्च॥ युवा खलतिपलितवलिनजरतीभिः॥
कृत्यतुल्याख्या अजात्या॥ वर्णो वर्णेन॥ कुमारश्रमणादिभिः॥ चतुष्पादो गर्भिण्या॥
मयूरव्यंसकादयश्च॥ १॥ ॥ समर्थोन्यपदार्थे च सि. दू. श्रुध्क सन्भ हद्वादश॥ ॥ इति
द्वितीयाध्यायप्रथमः पादः॥ ॥ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे॥ अर्धं न
पुंसकं॥ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां॥ प्राप्तापन्ने च द्वितीयया॥ कालाः
परिमाणिना॥ नञ्॥ ईषदकृता॥ षष्ठी॥ याजकादिभिश्च॥ न निर्धारणे॥ पूरणगु
णसुहितार्थसदव्ययतव्यसमानाधिकरणेन॥ क्तेन च पूजायां॥ अधिकरणवाचि
ना च॥ कर्मणि च॥ तृजकाभ्यां कर्तरि॥ कर्तरि च॥ नित्यं क्रीडाजीविकयोः॥ कुगति ९

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

प्रादयः॥ उपपदमतिङ्॥ अमैवाव्ययेन॥१॥ ॥तृतीयाप्रभृतीन्यन्यतरस्यां॥ क्त्वा च॥
शेषो बहुव्रीहिः॥ अनेकमन्यपदार्थे॥ संख्ययाव्ययासंना॥ दूराधिकसंख्याः संख्ये
ये॥ दिङ्नामान्यंतराले॥ तत्र तेनेदमिति सरूपे॥ तेन सहेति तुल्ययोगे॥ चार्थे द्वंद्वः॥ उप
सर्जनं पूर्वं॥ राजदंतादिषु परं॥ द्वंद्वे घि॥ अजाद्यदंतं॥ अल्पाच्तरं॥ सप्तमीविशेषणे
बहुव्रीहौ॥ निष्ठा॥ वाहिताग्न्यादिषु॥ कडाराः कर्मधारये॥२॥ ॥पूर्वापराधरोत्तरं
तृतीयाप्रभृतीन्यष्टादश॥ ॥इति द्वितीयाध्यायद्वितीयः पादः॥ ॥अनभिहिते॥ क
र्मणि द्वितीया॥ तृतीया च होश्छंदसि॥ अंतरांतरेण युक्ते॥ कालाध्वनोरत्यंतसंयो
गे॥ अपवर्गे तृतीया॥ सप्तमीपंचम्यौ कारकमध्ये॥ कर्मप्रवचनीययुक्ते द्वितीया॥

(१०)

सू०पा० १० यस्मादधिकंयस्यचेश्वरवचनंतत्रसप्तमी॥ पंचम्यपाङ्परिभिः॥ प्रतिनिधिप्रतिदा
नेचयस्मात्॥ गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनि॥ चतुर्थीसंप्रदाने॥
क्रियार्थोपपदस्यचकर्मणिस्थानिनः॥ तुमर्थाच्चभाववचनात्॥ नमस्स्वस्तिस्वाहा
स्वधालंवषड्योगाच्च॥ मन्यकर्मण्यनादरेविभाषाप्राणिषु॥ कर्तृकरणयोस्तृती
या॥ सहयुक्तेऽप्रधाने॥ येनांगविकारः॥ १॥ ॥इत्थंभूतलक्षणे॥ संज्ञोन्यतरस्यां
कर्मणि॥ हेतौ॥ अकर्तर्यृणेपंचमी॥ विभाषागुणेऽस्त्रियां॥ षष्ठीहेतुप्रयोगे॥
सर्वनाम्नस्तृतीयाच॥ अपादानेपंचमी॥ अन्यारादितरर्तेदिक्छब्दांचूत्तरप
दाजाहियुक्ते॥ षष्ठ्यतसर्थप्रत्ययेन॥ एनपाद्वितीया॥ पृथग्विनानानाभिस्तृ १०

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(IRA)

तीयान्यतरस्यां॥करणेचस्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य॥दूरांतिका
र्थैःषष्ठ्यन्यतरस्यां॥दूरांतिकार्थेभ्योद्वितीयाच॥सप्तम्यधिकरणेच॥यस्यचभा
वेनभावलक्षणं॥षष्ठीचानादरे॥स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतै
श्च॥आयुक्तकुशलाभ्यांचासेवायां॥२॥ ॥यतश्चनिर्धारणं॥पंचमीविभक्ते॥
साधुनिपुणाभ्यामर्चायांसप्तम्यप्रतेः॥प्रसितोत्सुकाभ्यांतृतीयाच॥नक्षत्रेच
लुपि॥प्रातिपदिकार्थलिंगपरिमाणवचनमात्रेप्रथमा॥संबोधनेच॥सामंत्रि
तं॥एकवचनंसंबुद्धिः॥षष्ठीशेषे॥ज्ञोविदर्थस्यकरणे॥अधीगर्थदयेशांकर्म
णि॥कृञः प्रतियत्ने॥रुजार्थानांभाववचनानामज्वरेः॥आशिषिनाथः॥जासि

Joint project of the ... Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com